## 'राजस्थान-संस्कृत-साहित्य-सम्मेलनम्' इत्यस्य प्रेरणादायी प्रयासः!

भारतस्य सर्वेष्वपि राज्येषु राजस्थानस्य स्वीयं विशिष्टं महत्वं वर्तते | यथा वयं सर्वे जानीमः सौराष्ट्रम्, महाराष्ट्रम्, राजस्थानम् – प्रभृतिनामभिः एतेषां राज्यानां वैशिष्ट्यानि सहजतया अवगन्तुं शक्यते | वीराणां, शूराणां, धीराणां, साधूनां, महात्मनां, भक्तानां, कलाकाराणां, विदुषां कविवराणां चैषा धरा सदा भावि-सन्ततेः कृते प्रेरणादायिनी स्थास्यति |

अस्मिन्नेव क्रमे २०१९-वर्षे फरवरी-मासे ७-८-९-दिनेषु जयपुरे सम्पन्नं त्रिदिवसात्मकं 'राष्ट्रिय-संस्कृत-सम्मलेनम्' सर्वेषां संस्कृतानुरागिणां संस्कृत-विद्या-समुपासकानां च कृते स्फूर्तिदायकमवर्तत | आशास्यते यत् सुख्यातस्य संस्कृत-समाराधकस्य पंडित-मोतीलाल-जोशिवर्यस्य पुण्यस्मृतौ सर्वतोभावेन समर्पितेन तस्यात्मजेन डॉ.राजकुमार-जोशि-महोदयेन प्रवर्तितोऽयं प्राथमिक-प्रयासः, राजस्थाने विगतेषु कतिपय-वर्षेषु सञ्जातानां मन्दगतिकाणां संस्कृत-कार्याणां कृते अवश्यमेव गतिं, सङ्गतिं प्रगतिञ्च प्रदास्यति | ऐषमः फरवरी-मासे ७-दिने प्रातः अस्य महनीयोपक्रमस्य शुभारम्भार्थं वैदिक-यज्ञानुष्ठानेन सह त्रिदिवसात्मकस्य 'राष्ट्रिय-संस्कृत-सम्मलेनस्य' अन्तर्गतं 'राष्ट्रिय-संस्कृत-पत्रकार-सम्मेलनम्' आरब्धम् | देशस्य विभिन्न-भागेभ्यः सम्प्राप्ताः, 'भारतीयसंस्कृत-पत्रकारसंघे'न चापि समामन्त्रिताः सुख्याताः वरिष्ठाः संस्कृत-पत्रकाराः च मञ्चोपरि विद्यमानाः आसन् | एतेषु 'भारतीय-संस्कृत-पत्रकारसंघस्य' संस्थापकः 'शारदा' -सम्पादकः पण्डित-श्रीवसन्त-राव-गाड्गिलः, सुख्यातः संस्कृत-कविः संघस्य प्रवर्तमानाध्यक्षः पद्मश्रीकः डॉ.रमाकान्तशुक्लः, 'भारती'-सम्पादकः देवर्षि-कलानाथ-शास्त्री, 'रसना'-सम्पादिका डॉ.श्यामला, 'सुधर्मा'-इति दैनिक-पत्रस्य सह-सम्पादिका श्रीमती जयलक्ष्मी, द्वारिका-संस्कृत-अकादम्याः अध्यक्षः प्राचार्यः जयप्रकाश-नारायण-द्विवेदी, 'सम्प्रति-वार्ताः'-इति ई-दैनिक-पत्रस्य सम्पादकः श्रीहरिकुमारः, संस्कृतपत्रकारसंघस्य महासचिवः डॉ.बलदेवानन्द-सागरः, 'लोकभाषा-प्रचार-समितेः' महासचिवः डॉ.सदानन्ददीक्षितः, 'वाक्' -इति साप्ताहिक-पत्रिकायाः संस्थापक-सम्पादकः डॉ.बुद्धदेवशर्मा, 'संस्कृतभवितव्यम्' - इति संस्कृतसाप्ताहिकस्य प्रकाशकः डॉ.चन्द्रगुप्तवर्णेकरः, 'संस्कृत-संवादः' -इति संस्कृत-पाक्षिकस्य प्रकाशक-प्रबन्धकः श्रीवेदशर्मा, 'संस्कृत-वर्तमानपत्रम्' इति दैनिकस्य डॉ.प्रफुल्ल-पुरोहितः चान्यतमाः आसन् |

अस्मिन्नवसरे 'राजस्थान-संस्कृत-साहित्य-सम्मेलनस्य' महासचिवः डॉ.राजकुमार-जोशी संस्कृत-पत्रकारिता-क्षेत्रे स्वीय-विशिष्ट-योगदानार्थं 'भारतीय- संस्कृत-पत्रकारसंघस्य' संस्थापकं, 'शारदा' -सम्पादकं पण्डित-श्रीवसन्त-राव- गाड्गिलं, संस्कृतपत्रकारसंघस्य महासचिवं डॉ.बलदेवानन्द-सागरं च विशिष्ट-सम्माननेन सभाजितवान् | तथा च, आगामिनि सम्मेलने 'रसना' -सम्पादिकां डॉ.श्यामलां, 'संस्कृतभवितव्यम्' - इति संस्कृतसाप्ताहिकस्य प्रकाशक-प्रबन्धकं डॉ.चन्द्रगुप्तवर्णेकरं चापि विशिष्ट-सम्माननेन पुरस्कर्तुं सभाजयितुं चोद्घोषितवान् |

अध्यक्षीयभाषणे, सुख्यातः संस्कृत-कविः, भा.सं.प.संघस्य प्रवर्तमानाध्यक्षः पद्मश्रीकः डॉ.रमाकान्तशुक्लः उपस्थितान् सर्वान् संस्कृत-पत्रकारान् सभासदश्च साधुवादान् वितरन् अकथयत् यत् अस्य समग्रस्य आयोजनस्य निमित्तमात्रस्य अभिनायकस्य डॉ.राजकुमारजोशिवर्यस्य कर्मयोगस्य भूमिका अभिनन्दनीयास्ति आचार्यः शुक्लः इदमपि न्यगादीत् यत् मम सम्पादकत्वे विगत-दशाब्द-चतुष्टयात् त्रैमासिक-पत्रिका 'अर्वाचीन-संस्कृतम्' इति अबाधगत्या प्रकाश्यते || डॉ.शुक्लः एतदपि अकथयत् यत् संस्कृत-पत्रकारिता-क्षेत्रे सम्मलेनमिदं शुभङ्कर-शुभारम्भत्वेन वर्तते | यथासौविध्यं काले काले अन्य-राज्येष्वपि एयादृन्शि संस्कृत-सम्मेलनानि आयोजितानि स्युः | हिमाचलप्रदेशेन नातिचिरं संस्कृतं निज-द्वितीय-राजभाषारूपेण घोषितमिति कृत्वा राज्यसर्वकाराय साधुवादान् व्याहरन् असौ अवादीत् यत् प्रत्येकमपि राज्ये संस्कृतं द्वितीय-राजभाषात्वेन घोषणीया, तथा चान्ततोगत्वा संस्कृतं भारतस्य राष्ट्रभाषा स्यादिति अस्मदीयं लक्ष्यमस्ति | लक्ष्यमिदं तदैव पूर्णतया अवाप्तुं शक्ष्यते यदा वयं सर्वेऽपि संस्कृतानुरागिणः वैचारिक-मानसिक- स्तरेषु सम्भूय कार्याणि आचरेम | आशास्महे- 'राजस्थान-संस्कृत-साहित्य-सम्मेलन'स्य बहवायामि-सम्मेलनमिदम् अस्यां दिशायां प्रेरणादायकं सेत्स्यति | जयतु भारतम्! जयतु संस्कृतम्!! जयतु राजस्थानम्!!!

***** ***** ***** *****

- डॉ.बलदेवानन्द-सागरः

दूरभाषः - ९८१० ५६२२ ७७ अणुप्रैषः - baldevanand.sagar@gmail.com